.. shrItrivikramastotram ..

॥ શ્રીત્રિવિક્રમસ્તોત્રમ્ ॥

# Sanskrit Document Information

Text title : shrItrivikramastotram

File name : shrItrivikramastotram.itx

Location : doc_vishhnu

Author : Vadiraja

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 25, 2017

*sanskritdocuments.org*

# ॥ શ્રીત્રિવિક્રમસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

વિદારિતારિસઙ્ઘાતં પદાક્રાન્તજગત્ત્રયમ્ ।
ગદાચક્રધરં ધીરં સદા વન્દે ત્રિવિક્રમમ્ ॥ ૧॥

શઙ્ખામ્ભોજકરદ્વન્દ્વહુઙ્કારાર્દિતદાનવ ।
શઙ્કાઽઽતઙ્કહરાહં તે કિઙ્કરોઽસ્મિ ત્રિવિક્રમ ॥ ૨॥

ક્ષમાકરોલ્લસચ્ચક્રં કૃપાવિપુલલોચનમ્ ।
અપારસુગુણસ્તોમમુપાસે તં ત્રિવિક્રમમ્ ॥ ૩॥

રમાધરાશ્લિષ્ટપાર્શ્વં સમસ્તસુરસેવિતમ્ ।
ભ્રમાદિદોષહરં તં નમામિ ત્રિવિક્રમમ્ ॥ ૪॥

યોગાદઙ્ગમજસ્રાક્ષીદ્ધઙ્ગામઙ્ગુષ્ઠતોઽસૃજત્ ।
તુઙ્ગામરચયા તુઙ્ગં તઙ્ગયામિ ત્રિવિક્રમમ્ ॥ ૫॥

નાનાલઙ્કારભરિતં પીનાવયવમોહનમ્ ।
જ્ઞાનાનન્દમયં વન્દે શ્રીનાથં તં ત્રિવિક્રમમ્ ॥ ૬॥

વૃન્દારકેન્દ્રવન્દ્યાઙ્ઘ્રિં નન્દિતીર્થમુનેઃ પ્રિયમ્ ।
કન્દર્પકોટિલાવણ્યં તં ધ્યાયામિ ત્રિવિક્રમમ્ ॥ ૭॥

સુધાકુન્દેન્દુધવલમધઃકૃતચરાચરમ્ ।
ઉદારમાદરદ્વન્દ્વે ત્રિધામાનં ત્રિવિક્રમમ્ ॥ ૮॥

વેદાન્તવેદિતગુણં બોધપ્રદમહર્નિશમ્ ।
આધારં નૌમિ જગતાં શ્રીધામાનં ત્રિવિક્રમમ્ ॥ ૯॥

અનુયાગેન બલિના મનુના મનનેન ચ ।
દિને દિનેઽર્ચિતં વન્દે મનસા તં ત્રિવિક્રમમ્ ॥ ૧૦॥

સર્પિઃપાયસનૈવેદ્યૈર્ભક્ષ્યૈશ્ચ વિવિધૈઃ સદા ।
નૃત્યવાદિત્રગીતૈશ્ચ તર્પયામિ ત્રિવિક્રમમ્ ॥ ૧૧॥

વાદિરાજેન્દ્રવરદં સોદાપુરનિવાસિનમ્ ।
મોદપ્રદં સદા વન્દે માધવં તં ત્રિવિક્રમમ્ ॥ ૧૨॥

ધૂપૈર્ગન્ધાનુલેપૈશ્ચ દીપૈરપિ મનઃપ્રિયૈઃ ।
તાપસૈઃ પૂજિતં વન્દે શ્રીપતિં તં ત્રિવિક્રમમ્ ॥ ૧૩॥

યોઽસૌ ધવલગઙ્ગાયાઃ પાર્શ્વે તિષ્ઠતિ સર્વદા ।
દેશે દેશે ચ વિખ્યાતમાસેવે તં ત્રિવિક્રમમ્ ॥ ૧૪॥

અગ્રે નિધાય શ્રીદેવીં પૃષ્ઠે પાર્શ્વે ચ સજ્જનાન્ ।
સ્વર્ગિભિઃ પરિતઃ સેવ્યા મધ્યે ભાતિ ત્રિવિક્રમઃ ॥ ૧૫॥

શિલામયૈ રમ્યતમશાલાવલભિમણ્ડપૈઃ ।
કલશૈશ્ચોલ્લસદ્દેવાલયે ભાતિ ત્રિવિક્રમઃ ॥ ૧૬॥

યાવચ્ચન્દ્રશ્ચ સૂર્યશ્ચ યાવત્તિષ્ઠતિ મેદિની ।
તાવત્ત્રિવિક્રમઃ સોઽયં પૂજ્યસ્તિષ્ઠતુ સજ્જનૈઃ ॥ ૧૭॥

ઇદં સ્તોત્રં વાદિરાજો મુદે સજ્જનસન્તતેઃ ।
વ્યધત્ત તેન પ્રીતોઽસ્તુ સદા શ્રીદસ્ત્રિવિક્રમઃ ॥ ૧૮॥

ઇતિ શ્રીવાદિરાજકૃતં ત્રિવિક્રમસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrItrivikramastotram ..
was typeset using XƎLATEX 0.99996
on March 25, 2017

Please send corrections to *sanskrit@cheerful.com*